श्री सूर्य कवच स्तोत्रं

श्री सूर्य कवच स्तोत्रं

याज्ञवल्क्य उवाच |
शृणुष्व मुनिशार्दूल सूर्यस्य कवचं शुभं |
शरीरारोग्यदं दिव्यं सर्वसौभाग्यदायकं || 1 ||

देदीप्यमानमुकुटं स्फुरन्मकरकुंडलं |
ध्यात्वा सहस्रकिरणं स्तोत्रमेतदुदीरयेत् || 2 ||

शिरो मे भास्करः पातु ललाटं मेऽमितद्युतिः |
नेत्रे दिनमणिः पातु श्रवणे वासरेश्वरः || 3 ||

घ्राणं घर्मघृणिः पातु वदनं वेदवाहनः |
जिह्वां मे मानदः पातु कंठं मे सुरवंदितः || 4 ||

स्कंधौ प्रभाकरः पातु वक्षः पातु जनप्रियः |
पातु पादौ द्वादशात्मा सर्वांगं सकलेश्वरः || 5 ||

सूर्यरक्षात्मकं स्तोत्रं लिखित्वा भूर्जपत्रके |
दधाति यः करे तस्य वशगाः सर्वसिद्धयः || 6 ||

सुस्नातो यो जपेत् सम्यग्योऽधीते स्वस्थमानसः |
स रोगमुक्तो दीर्घायुः सुखं पुष्टिं च विंदति || 7 ||

इति श्रीमद्याज्ञवल्क्यमुनिविरचितं श्री सूर्य कवच स्तोत्रं ||